हिमसंस्कृतवार्ता
दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः
■ पृष्ठ-5 ■ वर्ष-4 ■ अङ्क-40 | 1 | दिसम्बर 10,2024 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## पञ्चाङ्गम्
अद्य कालयुक्तः वि.सं. २०८१, कलियुगाब्धः ५१२५ हेमन्तऋतुः सूर्यदक्षिणायनम् मार्गशीर्षशुक्लदशमी तिथिः मार्गशीर्ष २५ प्रविष्टांशः मङ्गलमयः भवेत्

2 अग्निमे आय-व्ययके विशेषबालानां कल्याणाय नूतना योजना आनेष्यति सर्वकारः- मुख्यमंत्री सुखविन्दरसिंहसुक्खुः

3 महामहिम-उपराज्यपालवर्येण "कर्तव्यमार्ग" इति पत्रिकायाः तृतीयं संस्करणं विमोचितम्।

5 दमश्कस्य पतनम् - असादकुलस्य सिरियातः निर्गमनस्य तात्पर्याणि


## राहुलसर्व-सहमत्या महाराष्ट्र-विधानसभाध्यक्षः चितः



भारतीय-जनता-पार्टीति-दलेन राहुल-नार्वेकरः सर्व-सहमत्या महाराष्ट्र-विधानसभाध्यक्षः चितः। श्रीनार्वेकराय अस्मिन् पदे नियुक्तये मुख्यमन्त्री देवेन्द्रफडणवीसः उपमुख्यमन्त्रिणौ अजीत-पवार-एकनाथशिन्दे इत्येतौ प्रस्तावं अयच्छन्। मुख्यमन्त्री देवेन्द्र फडणवीसः अत्रावसरे श्रीनार्वेकराय वर्धापनानि प्रदत्तवान् विश्वासं च प्रकटितवान् यत् नार्वेकरः निष्पक्षतया सदनस्य कार्याचरणं संचालयन् सदनस्य परम्परां स्थापयिष्यति इति। विधानसभायाः कार्याचरणम् अवशिष्टानां नवनिर्वाचितानां विधायकानां शपथग्रहण-वचनेन सह समारब्धम् येभ्यः अस्थायि-अध्यक्षेण कालिदास-कोलम्बकरेण शपथवचनम् आकारितम् । महाराष्ट्रस्य राज्यपालः सी.पी. राधाकृष्णन् विधानसभायाः विधानपरिषदः च संयुक्तसत्रे सम्बोधितवान् तदनु उभयोः सदनयोः विभिन्नाः अध्यादेशाः प्रस्तोषिताः।

## झारखण्डे मुख्यमन्त्री हेमन्तसोरेनः सर्वैः अशीति-विधायकैः सह शपथवचनं स्वीकृतवान्



झारखण्डविधानसभायाः चतुर्दिवसीयस्य विशेष-सम्मेलनस्य आरम्भः राञ्ची-नगरे नवनिर्वाचित- सदस्यानां सभायां स्वागतेन सह जातः । मुख्यमन्त्री हेमन्तसोरेनः सर्वैः अशीति-विधायकैः सह शपथवचनं स्वीकृतवान्। कार्यवाहक सभाध्यक्षः स्टीफन्-मारण्डी इत्येषः नवनिर्वाचितेभ्यः सदस्येभ्यः शपथवचनं प्रदत्तवान्। अध्यक्षस्य निर्वाचनम् अद्य भविष्यति, तदनन्तरं हेमन्त-सोरेन्-सर्वकारस्य कृते विश्वासमतं भविष्यति। ततः परं राज्यपालः सन्तोषकुमार-गङ्गवारः विधानसभां सम्बोधयिष्यति। राज्यपालस्य अभिभाषणानन्तरं वर्तमानस्य वित्तवर्षस्य द्वितीयं अनुपूरक-आयव्ययिकं विधानसभायां प्रस्तोष्यते।

## श्रीमोदिना जयपुरे उदीयमान-राजस्थान-वैश्विक निवेश-शिखर सम्मेलनम्" इत्यस्य कृतम् उद्घाटनम्



हिमसंस्कृतवार्ताः। प्रधानमन्त्रिणा श्रीमोदिना जयपुरे उदीयमान-राजस्थान-वैश्विक निवेश-शिखर सम्मेलनम्" इत्यस्य उद्घाटनं कृतम् । त्रिदिवसीयसम्मेलनं सम्बोधयन् प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत्संशोधनं, कार्यान्वयनं, परिवर्तनं चेत्यादिभिः मन्त्रैः सह सर्वेषु क्षेत्रेषु भारतेन कृतानि विकासकार्याणि दृश्यन्ते ।आत्मनिर्भर-भारताभियानं वैश्विकम् अस्ति अस्य प्रभावोऽपि वैश्विकः वर्तते । एतदभियानमुद्दिश्य सर्वकारः समग्रदृष्टिकोणेन सह अग्रे सरति । श्रीमोदी प्रोक्तवान् यत् विश्वस्य निवेशकाः, विशेषज्ञाश्च भारतमुद्दिश्य उत्साहिताः सन्ति । श्रीमोदी प्रोक्तवान् यत् भारतस्य सफलता लोकतंत्रस्य, जनसांख्यिक्याः, अन्तर्जालीय-सूचनातन्त्रस्य कार्यान्वयनस्य च शक्तौ प्रदर्शिता भवति । अस्मिन् अवसरे प्रधानमन्त्री प्रोक्तवान् यत् देशे सुदृढलोकतन्त्रम् अस्ति । युवानः देशं विकासमार्गे अग्रे नेतुं महत्वपूर्णभूमिकां निर्वहन्ति ।
प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् सम्पूर्ण विश्वे भारतं लोकतन्त्रस्य, भूक्षेत्रस्य, सांख्यिक्याः च शक्तेः प्रदर्शनं करोति । राजस्थाने निवेशाय आवश्यकाधारभूत-सौविध्यानाम् उल्लेखं कुर्वन् श्रीमोदी प्रोक्तवान् यत् यदि राजस्थानम् विकासस्य नवीनशिखरं स्पृशति तर्हि देशः अपि नवीनोन्नतिं प्राप्स्यति । प्राकृतिक संसाधनानां, आधुनिक सूचनातन्त्रस्य, समृद्धसंस्कृतेः, सक्षम- युव-शक्तेः च उल्लेखं कुर्वन् प्रधानमन्त्री अकथयत् यत् एताः सर्वाः विशेषताः निवेशाय राजस्थानं महत्वपूर्ण-राज्यत्वेन संस्थापयन्ति । प्रधानमन्त्री अकथयत् यत् देशे विदेशि-पर्यटकानां संख्या निरंतर समेधते सहैव क्षेत्रीयपर्यटने अपि निरन्तरं नवीनकीर्तिमत् संस्थाप्यते । प्रधानमन्त्री प्रोक्तवान् यत् सूक्ष्म-लघु-मध्यमोद्यमाः कस्यापि देशस्य अर्थव्यवस्थां सशक्तं कर्तुं महत्वपूर्णं भूमिकां निर्वहन्ति । सर्वकारः अपि स्वनीतिभिः निर्णयैः च सूक्ष्म लघु- मध्यमोद्यम-क्षेत्राणि निरन्तरं सशक्तं करोति । इतः पूर्वं कार्यक्रमं संबोधयन् मुख्यमंत्री भजनलालशर्मा प्रोक्तवान् यत् सर्वकारः आगामि पंच-वर्षेषु राज्यस्य अर्थव्यवस्थां द्विगुणीकर्तुं लक्ष्यं निर्धारितवान् । तेन आशा व्यक्तीकृता अस्ति यत् इदं शिखर सम्मेलनं विकसितभारतस्य विकसित-राजस्थानस्य संकल्पं साकारं कर्तुं महत्वपूर्णं भविष्यति । अनन्तरं प्रधानमन्त्रिणा नरेन्द्रमोदिना भारतीय-जीवनबीमानिगम इत्यस्य बीमा-शक्ति-योजनायाः शुभारम्भः हरियाणायाः पानिपतजनपदे महाराणाप्रताप-औद्यानिक-विश्वविद्यालये कृतः ।

## विक्रममिस्री बाङ्ग्लादेश-प्रतिपक्षेन जसीम्-उद्दीनेन सह भारतीयनिधिसङ्घस्य प्रतिनिधित्वम् अकरोत्



भारतीयविदेशकार्यसचिवः विक्रममिस्री, ढाका-नगरे भारत-बाङ्ग्लादेशविदेश-कार्यालय-परामर्शमण्डले भारतीयप्रतिनिधिसङ्घस्य नेतृत्वं स्वस्य बाङ्ग्लादेश-प्रतिपक्षेन जसीम्-उद्दीनेन सह करोति। गतप्रातः एकादशवादने ढाका-नगरस्य पद्मा-स्टेट-गेस्ट हाउस् इत्यत्र परामर्शः आरब्धः। श्रीमिस्री गतदिने सार्धाष्ट-वादने भारतीय वायुसेनायाः विमानेन ढाका-नगरं प्राप्तवान्। सभायाः अनन्तरं, विदेशसचिवः भोजने भागग्रहणं, बाङ्ग्लादेशस्य विदेश-प्रकरणस्य परामर्शदेन मोहम्मद-तौहिद-हुसैन इत्यनेन सह शिष्ट-संवादं करिष्यति।

## सुभाषितम्

विद्वत्वं च नृपत्वं च,
नैव तुल्यं कदाचन्।
स्वदेशे पूज्यते राजा,
विद्वान् सर्वत्र पूज्यते॥


भावार्थः- राजत्व प्राप्ति और विद्वत्व प्राप्ति की किंचित मात्र भी तुलना नहीं हो सकती क्योंकि राजा की पूजा केवल उसके अपने देश में ही होती है जबकि विद्वान् की पूजा सर्वत्र (पूरे विश्व में) होती है।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु
To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp number

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## पारसीधर्मजनानां जनसङ्ख्यायां विगत-वर्षेषु सततं न्यूनता




अल्पसङ्ख्यक-कार्यमन्त्रालयः अवदत् यत् देशे पारसी उत वा ज़ोरास्ट्रियन् इत्येतेषां जनसङ्ख्यायां विगत-वर्षेषु सततं न्यूनता समायाता । राज्यसभायां एकस्य प्रश्नस्य लिखिते प्रत्युत्तरे केन्द्रीय-अल्पसङ्ख्यक कार्यमन्त्री किरेन रिजिजुः अवदत् यत् एक-चत्वारिंशदधिक- नवदश-शततमे वर्षे देशे एक-दशमलव एकं चत्वारि लक्षतः अधिकाः पारसीधर्मजनाः आसन् यानि एकादशाधिक-द्वि-सहस्र-तम-वर्षस्य जनगणनानुसारं सप्त पंचाशत्सहस्रं यावत् न्यूनाः जाताः । केन्द्रीयमंत्री अवदत् यत् राष्ट्रिय-अल्पसङ्ख्यक आयोग अधिनियमस्य अन्तर्गतं अधिसूचितानां एतेषां अल्पसङ्ख्यकानां समूहानां जनसंख्यायाः अल्पतां निवारयितुं केन्द्रेण अनेके उपक्रमाः कृताः सन्ति।

# CM Sukhu : अग्रिमे आय-व्ययके विशेषबालानां कल्याणाय नूतना योजना आनेष्यति सर्वकारः- मुख्यमंत्री सुखविन्दरसिंहसुक्खुः



हिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः शिमलामण्डलस्य हीरानगरे ६.६७ कोटिरूप्यकाणां व्ययेन निर्मितस्य बौद्धिकदिव्याङ्गबालानां कृते विशेष- आवासीय-विद्यालयस्य उद्घाटनं कृतवान्। मुख्यमन्त्री उक्तवान् यत् राज्ये एतादृशः प्रथमः विशेषः आवासीयः विद्यालयः अस्ति यः ६-१८ वर्षाणाम् आयुवर्गस्य बौद्धिकरूपेण दिव्याङ्गबालानां कृते निर्मितः अस्ति। सः अवदत् यत् बौद्धिकरूपेण दिव्याङ्गबालानां कृते आवासीयसुविधाभिः सह निःशुल्कगुणात्मक-शैक्षिकव्यावसायिकशिक्षणं प्रदातुं राज्ये एषा प्रथमा संस्था अस्ति। विद्यालयखण्डे सङ्गणकप्रयोगशाला, संगीतकक्षः, बहुउद्देश्यकः सभागारः, छात्रावासखण्डे ५० बालकानां कृते छात्रावासः चिकित्साकक्षः, कर्मचारिणां कृते आवासीयसुविधाः च सन्ति।सुखविन्दरसिंहसुक्खुः उक्तवान् यत् वर्तमानस्य राज्यसर्वकारस्य प्रयत्नेन हिमाचलप्रदेशः देशस्य प्रथमं राज्यं जातम् यत् निर्धनबालानां सम्यक् परिचर्यायाः शिक्षायाः च विधानम् अङ्गीकृतवान्। राज्यसर्वकारेण मुख्यामन्त्री सुख-आश्रययोजना आरब्धा, तान् 'राज्यस्य बालकाः' इति स्वीकृतम् अस्ति। एतेषां बालकानां शिक्षाव्ययस्य अतिरिक्तं राज्यसर्वकारः तेषां कोषधनस्य कृते प्रतिमासं चतुर्सहस्रुरूप्यकाणि प्रददाति इति सः अवदत्। सः अवदत् यत् मुख्यमन्त्री सुख-आश्रययोजनायाः अन्तर्गतं विगतवर्षद्वये राज्ये ३८.५० कोटिरूप्यकाणां लाभाः प्रदत्ताः। सः अवदत् यत्, "राज्यसर्वकारस्य प्रथमे आय-व्ययके मुख्यमन्त्री सुखाश्रय-योजना आरब्धा। द्वितीये आय-व्ययके राज्यस्य विधवाबालानां २३ सहस्राणां शिक्षायाः सम्पूर्णं व्ययम् राज्यसर्वकारेण वोढुं प्रावधानं कृतम् अस्ति। तृतीये आय-व्ययके बौद्धिकरूपेण दिव्याङ्गबालानां कृते विस्तृतयोजनायाः प्रावधानं भविष्यति। अस्य कृते एतेषां बालकानां शिक्षकैः सह अपि चर्चा भविष्यति, येन तेषां आवश्यकताः योजनायां समाविष्टाः भवेयुः।मुख्यमन्त्री उक्तवान् यत् राज्यसर्वकारस्य सामाजिकसुरक्षाक्षेत्रे विशेषं ध्यानं वर्तते तथा च एतत् दृष्ट्वा सोलनमण्डलस्य कण्डाघाटे नवसहस्रदिव्याङ्गजनानाम् उच्चशिक्षाप्रदानार्थं उत्कृष्टताकेन्द्रस्य स्थापना क्रियते, यस्य निर्माणं वर्षद्वये सम्पन्नं भविष्यति। सः अवदत् यत् राज्यसर्वकारः दिव्याङ्गजनानाम् शिक्षणाय प्रशिक्षणाय च निरन्तरं प्रयत्नान् कुर्वन् अस्ति येन तेभ्यः समाजे सम्माननीयं स्थानं प्रदातुं शक्यते। राज्यसर्वकारः मण्डीमण्डलस्य सुन्दरनगरे, काङ्गड़ामण्डलस्य लुथाने च ९२.३३ कोटिरूप्यकाणां व्ययेन ४०० आश्रितानाम् आवासीयक्षमतायुक्तानां मुख्यमन्त्री आदर्शग्राम-सुखाश्रयसङ्कुलानां निर्माणं कुर्वन् अस्ति।

## त्रिरुप्यकाणि प्रतिकिलोग्रामं गोमयोर्वरकम् क्रेष्यति सर्वकारः- कृषिमन्त्री चन्द्रकुमारः




### पुटकं निर्माय उद्यानपालकेभ्यः आपूर्तिं प्रदास्यते

हिमसंस्कृतवार्ताः - धर्मशाला। ११ दिसम्बरतः राज्यसर्वकारः गोमयस्य स्थाने गोमयेन निर्मितम् उर्वरकं प्रतिकिलो त्रिरूप्यकाणां दरेन क्रीणाति। अस्य कृते संग्रहस्य व्यवस्था अपि कृता। तदनन्तरं पञ्च, १०, २०, ५० तः ५०० किलोग्रामस्य पुटकं निर्माय उद्यानसस्यानां, सेबसस्यानां च कृते उपलभ्यते। अस्मिन् शिमला, किन्नौरः, लाहौल-स्पीतिः जनपदेषु उद्यानकार्यार्थं तस्य विक्रयणस्य योजनायाः कार्यं प्रचलति। इति कृषिपशुपालनमन्त्री प्रो. चन्द्रकुमारः धर्मशालायां उक्तवान्। सः अवदत् यत् कृषिपर्यटनस्य विकासाय अपि च बाधितकृषेः पुनः आरम्भार्थं प्रयत्नाः क्रियन्ते।कृषिमन्त्री उक्तवान् यत् भविष्ये दूरसंवेदनद्वारा मानचित्रणं कृत्वा भूमिप्रयोगस्य स्वरूपं परिवर्तयितुं प्रयत्नाः क्रियन्ते, यस्मिन् क्षेत्रस्य आकारस्य क्षमतायाः च अनुसारं कृषिः क्रियते। देहरादूनेन सह सम्पर्कः कृतः, तत्र प्रशिक्षणं भविष्यति। चन्द्रकुमारः अवदत् यत् भाजपायाः चिन्तनं लोकतान्त्रिकरूपेण निर्वाचितं सर्वकारं पातयितुम्, कम्पयितुं च अभवत्, यस्य प्रयासः ते महाराष्ट्र-आन्ध्रप्रदेशयोः अनन्तरं हिमाचलप्रदेशे कृतवन्तः, यस्मिन् ते सफलतां प्राप्तुं न शक्तवन्तः।

### उत्सवः न, अपि तु उपलब्धीनां उत्सवस्य कार्यक्रमः

कृषिमन्त्री चन्द्रकुमारः अवदत् यत् राज्यसर्वकारः ११ दिसम्बर् दिनाङ्के किमपि उत्सवं न कर्तुं गच्छति, परन्तु विगतवर्षद्वयस्य स्वस्य उपलब्धीनां कार्याणि च जनसामान्यस्य समक्षं प्रस्तौतुं कार्यक्रमस्य आयोजनं कुर्वन् अस्ति। अस्मिन् काले भाजपायाः सर्वकारस्य अस्थिरीकरणाय कृताः प्रयत्नाः अपि जनसामान्यस्य समक्षं स्थापिताः भविष्यन्ति।

## १८ दिसम्बर दिनाङ्के ज़ोरावर- क्रीडाङ्गणे भाजपायाः प्रदर्शनम्




हिमसंस्कृतवार्ताः - धर्मशाला। प्रशासनिक जनपदे कांगड़ायां भारतीय- जनता- पार्टीति दलेन परिधिगृहे धर्मशालायां दलस्य वरिष्ठनेता, पूर्वविधानसभाध्यक्षः, कांगड़ा- चम्बायाः भाजपाप्रभारी एवं विधायकः विपिनसिंहपरमारः, हिमाचलप्रदेश- भारतीय- जनता- पार्टीति दलस्य महासचिवस्य त्रिलोक कपूरस्य उपस्थितौ गोष्ठीं कृतवान्। गोष्ठ्यां प्रशासनिकजनपदस्य कांगड़ायाः भाजपायाः नेतारः त्रयाणां मण्डलानां च प्रमुखाः नेतारः उपस्थिताः अभवन्। सत्रे १८ दिसम्बर दिनाङ्के सुक्खुसर्वकारस्य लक्ष्यीकर्तुं रणनीतिः निर्मिता। सभायां सर्वाः व्यवस्थाः चर्चिताः। अस्मिन्नवसरे भारतीय- जनता- पार्टीति दलस्य प्रदेशोपाध्यक्षः व : विधायकः पवनकाजलः, भाजपायाः प्रदेशप्रवक्ता राकेश शर्मा, संजय शर्मा, हिमाचलप्रदेशभाजपायाः सहमीडियाप्रभारी अधिवक्ता विश्वचक्षुः, जिलाकांगड़ायाः भाजपाध्यक्ष सचिनशर्मा, महासचिवः देवेन्द्र कोहली, पूर्वविधायकः अरुणकुमार कुका, पूर्वविधायक रीताधीमान, भाजपाप्रत्याशी संजय गुलेरिया, नूरपुर- संगठनात्मक- जनपदस्य अध्यक्षः रमेशराणा, अन्ये भाजपानेतारः कार्यकर्तारश्च उपस्थिताः अभवन्।

## धर्मशाला- कनेडविद्यालये समाचरितः वार्षिकोत्सवः




हिमसंस्कृतवार्ताः,धर्मशाला। हिमाचलस्य विद्यालयेषु साम्प्रतं वार्षिकोत्सवानां कार्यक्रमाः प्रचलने सन्ति। अस्मिन्नैव क्रमे कांगड़ाजनपदान्तर्गतं धर्मशालाशिक्षाखण्डे अवस्थिते कनेड इत्याख्ये राजकीयवरिष्ठमाध्यमिकविद्यालये वार्षिकोत्सवस्य आयोजनं चन्द्रवासरे सुसम्पन्नम् अभवत्। कार्यक्रमे धर्मशाला नगरनिगमस्य पार्षदः देवेन्द्रजग्गी वर्यः मुख्यातिथित्वेन उपस्थितः जातः, तेन सह वर्तमानमहापौरः नीनूशर्मा अपि उपस्थिताः आसीत्। कार्यक्रमे विद्यालयस्य छात्रैः सांस्कृतिककार्यक्रमाणां प्रदर्शनं कृतम्। विद्यालयस्य शिक्षकाभ्यां डॉ.अमनदीपशर्मणा ममताठाकुरेण च मञ्चसञ्चालनं कृतम्। विद्यालयस्य प्रधानाचार्यया श्रीमतिधर्मदेवीवर्यया समेषाम् समागतानां स्वागतं कृत्वा विद्यालयस्य वार्षिकप्रगतेः प्रतिवेदनं पठितम्, तया स्वविद्यालयस्य शिक्षकाणां छात्राणाञ्च कार्यक्रमस्य मुख्यातिथिवर्यस्य शाटिकावस्त्रेण शिरस्त्राणवस्त्रेण च सम्मानं कृत्वा स्मृतिचिह्नेन साहूहिकं चित्रं स्वीकृतम्। कार्यक्रमस्य मुख्यातिथिवर्येण विद्यालयाय 21000 रूप्यकाणां सहयोगः प्रदत्तः, तथा च विद्यालयस्य यथासम्भवं सहयोगं कर्तुं निवेदितम्। तेनोक्तं यत् स्थानीयविद्यालयस्य सर्वे प्रयासाः प्रशंसनीयाः वर्तन्ते, येन छात्राः लाभान्विताः दृश्यन्ते। कार्यक्रमस्यान्ते छात्राः पारितोषिकैः पुरस्कृताः।


# भादसों नगरे "श्रीमद्भगवद्गीतायां विद्यार्थीजीवनस्य सूत्रम्" इति विषयोपरि अभवत् व्याख्यानम्



संस्कृतभारती, पञ्जाबप्रान्तः, यंग फॉर्मरज पब्लिक हाई स्कूल भादसों एतयोः संयुक्त तत्त्वावधानेन दशदिवसीयसंभाषणशिबिरं सञ्जातम्। विद्यालयस्य प्राचार्या मनजीतकौर गरेवालमहोदयायाः अध्यक्षतायां श्रीगीताजयन्ती महोत्सवस्य उपलक्ष्ये श्रीमद्भगवद्गीतायां विद्यार्थीजीवनस्य सूत्रम् इति विषयोपरि व्याख्यानमपि जातम्। यस्मिन् पटियाला जिलामन्त्री गगनदीपपाठकमहोदयः मुख्यवक्ता रूपेण आसीत्। महोदयेन छात्रेभ्यः श्रीमद्भगवद्गीतायाः विभिन्न प्रसङ्गानां विद्यार्थी जीवने उपयोगितायाः चर्चा कृता।अवसरेऽस्मिन् विद्यालये विज्ञानप्रदर्शन्याः अपि आयोजनं कृतं, यस्मिन् विद्यालयस्य सर्वे छात्राः भागं गृहीत्वा प्राचीनभारतीय-ज्ञानविज्ञानपरम्परायाः विषये ज्ञातवन्तः। अवसरेस्मिन् नाभानगरस्य विस्तारकः मनीषमहोदयः, विद्यालयस्य उप-प्राचार्यः जशनदीपकुमारमहोदयः आसीत्, विद्यालयस्य अन्य शिक्षकानां सहयोगम् अपि प्राप्तवन्तः।

# महामहिम-उपराज्यपालवर्येण "कर्तव्यमार्ग" इति पत्रिकायाः तृतीयं संस्करणं विमोचितम्

## संस्कृत- अनुसन्धाने उच्च- मानदण्ड- स्थापनाय श्रीकैलख-संस्थानस्य प्रयत्नान् महामहिम- उपराज्यपालवर्यः प्रशंसति



**यूनां ज्ञानवैभवं जम्मू-कश्मीरस्य भविष्यं निर्णेष्यति। सर्वकारस्य सर्वे विभागाः तान् सशक्तीकर्तुं, तेषां स्वप्नान् साक्षात्कर्तुं समर्थनं मार्गदर्शनं च दातुं संकल्पिताः इति उपराज्यपालः उक्तवान्। ज्ञानेन साहसस्य, करुणायाः, त्यागस्य, निःस्वार्थसेवायाश्च मूल्यानि यूनां बोधं व्यक्तित्वं च समृद्धं कर्तुमावश्यकम्।**

हिमसंस्कृतवार्ताः- डॉ. मूलचन्द्रशुक्लः, जम्मूः दिसम्बरमासस्य (09) नवमदिनाङ्के महामहिमः उपराज्यपालः मनोजसिन्हावर्येण राजभवने श्रीकैलख- ज्योतिष- वैदिक- संस्थान- ट्रस्टद्वारा प्रकाशितायाः "कर्तव्यमार्ग" इति वार्षिकगृहपत्रिकायाः तृतीयं संस्करणं विमोचितम्। उपराज्यपालमहोदयेन पत्रिकायाः सम्पादने तत्परेभ्यः सम्पादकेभ्यः सर्वेभ्यः सदस्येभ्यश्च नैकाः शुभकामनाः प्रेष्यन्ते। संस्कृतस्य संवर्धनाय, प्रचारप्रसाराय, प्राक् ज्ञानपरम्परायाः अग्रे वर्धनाय अनुसन्धानक्षेत्रेषु च उच्च-मानदण्डस्थापनाय संस्थानसदस्यानां प्रयत्नाः प्रशंसिताः।

उपराज्यपालमहोदयेन प्रोक्तं यत्- "जम्मूकश्मीरस्य भविष्यं तस्य युवशक्तौ वरीवर्ति। सर्वकारस्य सर्वे विभागाः तान् सशक्तीकर्तुं, तेषां स्वप्नान् पूर्त्यर्थं समर्थनं मार्गदर्शनं च दातुं प्रतिबद्धाः। युवजनेषु साहसस्य, करुणायाः, त्यागस्य, निःस्वार्थसेवायाश्च मूल्यानि यूनां व्यक्तित्वं समृद्धं कर्तुं ज्ञानस्य प्रादुर्भाव आवश्यकः।"पत्रिकायाः सम्पादनं श्रीकैलख-ज्योतिषवैदिकसंस्थानट्रस्ट इत्यस्य अध्यक्षेण महन्तः रोहितशास्त्री इत्यनेन विहितम्। पत्रिकायां ख्यातसंस्कृत- विद्वद्भिः, युव- अनुसन्धानकर्तृभिश्च रचिताः अनेके शोधाभिनिवेशिताः लेखाः प्रकाशिताः।श्रीकैलखज्योतिषवैदिकसंस्थानट्रस्ट इत्यस्य आर. के. छिब्बर, प्रो. शरतशर्मा, निगमगुप्ता, सुनीलशर्मा, विनय अग्रवालः, डॉ. संजयशर्मा इत्यादयः सदस्याः उपस्थिता आसन्।

# धारावाहिकं गीताप्रश्नोत्तरम् -८४

अर्जुनः- भगवन्! तेषाम् आसुरीसम्पद्वतां कीदृशानि कर्माणि भवन्ति?

श्रीकृष्णः- पार्थ! ये नास्तिकदृष्टियुक्ताः, ते आत्मानं नित्यस्वरूपं न मन्यन्ते। तुच्छमतीनां तेषां कर्माणि अपि अत्यन्तं भयानकानि एव भवन्ति। ते जगतः शत्रवः कथ्यन्ते, तेषां सामर्थ्यं, प्रत्येकम् आचरणं च केवलं जगतः अहिताय एव भवति। दुष्पूरकामान् अवलम्बिताः, दम्भ-मान-मदादिभिः अन्विताः ते अपवित्रयुतानि आचरणानि धारयन्तः, मोहात् अनेकान् दुराग्रहान् गृहीत्वा च लोके विचरन्ति।

अर्जुनः- तेषां भावाः च कीदृशाः भवन्ति भगवन्?

श्रीकृष्णः- अर्जुन! आमरणं महतीं लौकिकचिन्ताम् आश्रिताः, कामोपभोगपरमाः मनुष्याः ते, यत्किञ्चित् स्यात्, तत् एतावदेव इति निश्चिताः भवन्ति, अर्थात् सुखभोगः, वस्तूनां सङ्ग्रहः इत्यादिकम् एतावदेव इति मन्यन्ते।

अर्जुनः- तेषां लक्ष्यं किं भगवन्? अर्थात् ते कीदृशम् उद्देश्यं स्वीकृत्य चलन्ति?

श्रीकृष्णः- अहो, अर्जुन! ते तु सहस्रशः आशापाशैर्बद्धाः सन्तः, कामक्रोधपरायणाः ते मनुष्याः केवलं सुखभोगार्थमेव अन्यायपूर्वकं धनसङ्ग्रहं कुर्वन्तः अग्रेसराः भवन्ति।

अर्जुनः- तेषाम् अन्ये मनोरथाः कीदृशाः भवन्ति, भगवन्?

श्रीकृष्णः- पार्थ! अज्ञानेन पूर्णतः आवृताः, विमोहिताः च ते 'एतावत् धनं तु अद्य प्राप्तमेव, अनन्तरम् अन्यदपि अवश्यं मया



✍असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

प्राप्स्यते', 'एतावत् धनं मत्पार्श्वे अस्त्येव, अनन्तरम् इतोऽपि एतावच्च अवश्यं भविष्यति' इति, 'सः शत्रुः मया धनार्थं हतः, अनन्तरम् अपरश्च हनिष्यते' इति एतादृशान् मनोरथान् गृहीत्वा ते मूढाः विचरन्ति। एवमेव अहं सर्वसमर्थोऽस्मि, सिद्धोऽस्मि, बलवान् अस्मि, बहुभोगभोक्ता अस्मि, धनवान् अस्मि, बहुः अभिजनसमुदाययुक्तोऽस्मि, मत्सदृशः अन्यः कः भवितुमर्हेत् जगति? अहमेव यज्ञादीन् करिष्ये, दानानि दास्यामि, मोदिष्ये इत्येवं ते मूढाः अज्ञानेन अनेकान् मनोरथान् कुर्वन्ति।

अर्जुनः- धिक् तेषां मनोरथान्! तर्हि, हे प्रभो! तादृशानां मनुष्याणां परिणामे का गतिः भवति?

श्रीकृष्णः- हे भारत! अनेकेषु भ्रमेषु भ्रान्ताः, मोहजाले निमग्नाः, पदार्थभोगसङ्ग्रहादिषु रममाणाः, परमासक्ताः एतादृशाः मनुष्याः परिणामे घोरनरकेषु पतन्ति इति, शम्। (गी० - १६/०९-१६) (अनुवर्तिष्यते)

# सामान्यज्ञानम्

प्रश्नः 1. भारते **नटराजमन्दिरम्** कुत्र अस्ति?

उत्तरम् :चिदंबरम (तमिलनाडुप्रान्ते)

प्रश्नः 2. **'काव्यादर्शः'** इत्यस्य रचयिता कः अस्ति?

उत्तरम् - 'दण्डी'।

प्रश्नः 3. सौरमण्डले कः ग्रहः "लोहितग्रहः" (लालग्रह) इति नाम्ना प्रसिद्धः अस्ति?

उत्तरम् - सौरमण्डले "लोहितग्रहः" इति नाम्ना मङ्गलग्रहः प्रसिद्धः

प्रश्नः 4. सर्वातिः उष्णः महाद्वीपः कः अस्ति?

उत्तरम्- सर्वातिः उष्णः महाद्वीपः अफ्रीका अस्ति।

प्रश्नः 5. भारतस्य राष्ट्रीयध्वजं केन डिजाइनितं कृतम् (कल्पितम्) अस्ति?

उत्तरम्- भारतस्य राष्ट्रीयध्वजं 'पिंगली वेंकय्या' इत्येन डिज़ाइनितं कृतम् (कल्पितम्) अस्ति।

**डॉ. विवेक शर्मा, जोगिन्द्रनगरम्**

# हरिद्वारे त्रिदिवसीय-तृतीय-संस्कृतच्छात्र-क्रीडाप्रतियोगितानां प्रारम्भः

**कुलदीपमैन्दोला।** हरिद्वारस्थे ऋषिकुलविद्यापीठब्रह्मचर्याश्रमसंस्कृतमहाविद्यालये तृतीया संस्कृतच्छात्र-क्रीडाप्रतियोगिता 2024 सोमवासरे 09 दिसम्बर 2024 दिनांके प्रातः 10 वादने आरभ्यते। अयम् कार्यक्रमः त्रिदिवसपर्यन्तं संजायते । प्रथमदिवसे (09 दिसम्बर 2024) शुभारम्भसमारोहः सम्पद्यते ततः कन्दुक-क्रीडाप्रतियोगिता (क्रिकेट् ) इति च हस्तकन्दुक-क्रीडाप्रतियोगिता (वॉलीबाल) इति प्रवृत्ते।अध्यक्षपदमलंकरोति श्रीमान् पूर्वरणजीप्रतिभागी प्रकाशचन्द्रजोशीवर्यः । मुख्यातिथपदमलंकरोति श्रीमान् सन्दीपगोयलः जिलाध्यक्षः भारतीयजनतापार्टी, हरिद्वारम् एवं च विशिष्टातिथिपदलंकुरुतः श्रीमान् ललितरावतः निर्वतमान-पार्षद्, हरिद्वारम्, नगरनिगमतः श्रीमान् परविन्द्रगिलः निर्वतमान-पार्षद्, हरिद्वारम् इत्येते महानुभावाः समंचासीनेन उद्घाटनं सफलीकुर्वन्ति ।द्वितीयदिवसे (10 दिसम्बर 2024) दिनांके धावनक्रीडाप्रतियोगिता (ऐथलेटिक्स) च लम्बकूर्दन-क्रीडाप्रतियोगिता (लम्बीकूद) इति सम्पद्यतेअत्र अध्यक्षपदमलंकरोति माननीयः मदनकौशिकः हरिद्वारविधायकः, तथा च मुख्यातिथिरूपेण सभामलंकरोति माननीयः डॉ. धनसिंहरावतः संस्कृतशिक्षामन्त्री, विशिष्टातिथिरूपेण अत्र श्रीमान् दीपककुमारः सचिवः संस्कृतशिक्षा सभामलंकरोति च सहैव मार्गदर्शकः डॉ० आनन्दभारद्वाजः निदेशकः संस्कृतशिक्षा, एवं च मार्गदर्शकः डॉ० वाजश्रवा आर्यः सहायकनिदेशकः संस्कृतशिक्षा - हरिद्वारम् इत्येते समेषां क्रीडकानां प्रोत्साहनं कुर्वन्ति ।तृतीयदिवसे (11 दिसम्बर 2024) दिनांके सम्पूर्ति-पुरस्कारवितरणसमारोहः सम्पद्यते।कार्यक्रमाध्यक्षरूपेण स्वामीरविदेव-शास्त्रीमहाराजःपरमाध्यक्षः गरीबदासी-आश्रमः, हरिद्वारम् तथा च मुख्यातिथिः - श्रीमान् रमेशगड़ियामहोदयः मा. राज्यमंत्री, उत्तराखण्डसर्वकारः एवं च विशिष्टातिथिः - महन्तपरमपूज्यः शिवानन्दमहाराजः अध्यक्षः अखिल-भारतीययुवा-साधुसमाजः च मार्गदर्शकः डॉ० वाजश्रवा आर्यः सहायकनिदेशकःसंस्कृतशिक्षाहरिद्वारं सर्वे प्रतिभागिनां कृते पुरस्कारवितरितवान्

# भस्मस्य महत्त्वम्



एकोननवतितमदशकीयुगस्य कालखण्डे ग्रामेषु वा सामान्यतया गृहेषु च फेनकं नाभवत्, तदा हस्तमार्जनाय यः सर्वसुलभः पदार्थः आसीत्, स च चूल्हस्य भस्मम्! तत् भस्मं काष्ठानां गोमयं च कण्डानां दहनात् जायते, यत् भाण्डानि मार्जनाय अपि उपयुज्यते।
किं कारणं यत् चूल्हस्य भस्मं तदा सेनिटाइजररूपेण उपयुज्यमानम् आसीत् तथा भाण्डमार्जनाय सुरक्षितः उपायः?
चूल्हस्य भस्मस्य संगठनं तादृशमेव अस्ति। आगच्छतु, अस्य वैज्ञानिकमवलेखनं कुर्मः।भस्मे ते सर्वे तत्त्वाः सन्ति यान् वनस्पतयः धरणीतः वा वातावरणतः ग्रहणं कुर्वन्ति। तत्र प्रमुखं तत्त्वं कैल्शियमस्य अस्ति। पोटैशियम, अल्युमिनियम, मैग्नीशियम, आयरन, फॉस्फोरस, मैंगनीज़, सोडियम, नाइट्रोजनं च विद्यमानानि सन्ति। अल्पमात्रायां जिंक, बोरॉन, कॉपर, लेड, क्रोमियम, निकल, मोलिब्डेनम, आर्सेनिक, कैडमियम, मर्करी चापि सन्ति।भस्मस्य कैल्शियम पोटैशियम च उपस्थितेः कारणेन अस्य पी. एच. मानं ९-१३.५ पर्यन्तं भवति। एतादृशः पी. एच. हस्ते भस्मं जलं संयुज्य मर्दनेन वा भाण्डमार्जनेन यः प्रभावः सृज्यते, सः फेनकस्य उपयोगेन उत्पाद्यमाने प्रभावे तुल्यः भवति। अस्य फलस्वरूपेण जीवाणुविषाणूनां नाशः सञ्जायते। अद्य च मननं कुर्मः तस्मिन् सनातनतत्त्वे, यं अद्य सर्वजगतः स्वीकरणाय विवशः। सनातनधर्मे मृतशरीरं दग्ध्वा ततः भस्मं वहत्सलिले समर्पयितुं प्रावधानं अस्ति। मृतस्य देहस्य भस्मं जले मिलनं तदेव शरीरस्य पञ्चतत्त्वेषु समावेशनं करोति। मृतशरीरम् अग्नितत्त्वाय समर्पयन्तः तेन सह काष्ठोपले अपि दग्ध्यन्ते। अन्ते यत् भस्म उत्पाद्यते, तत् जलं प्रवाहितं भवति। जले प्रवाहितं भस्म जलस्य विजन्तुनीकृतं (डिसइन्फैक्टेन्ट) कर्तुं शक्यते। अस्य भस्मस्य कारणेन मोस्ट प्रोबेबिल नम्बर ऑफ कोलीफॉर्म (MPN) न्यूनीकृतं भवति, डिजोल्व्ड ऑक्सिजन (DO) मात्रा वर्धते। वैज्ञानिकाध्ययनेन निश्चिन्तं कृतमस्ति यत् गोमयजन्यं भस्मं न्यूनमूल्ये पर्यावरणपोषक, विकल्परूपेण विजन्तुनीकृतं (डिसइन्फेक्शन) कर्तुं शक्यते। अस्य उपयोगः सीवेज जलप्रक्रियायाम् अपि कर्तुं शक्यते। सनातनधर्मस्य प्रत्येकं क्रियाकलापं विशुद्धवैज्ञानिकसंविधानं प्रति आधारितम् अस्ति।

## आम-आदमी-पार्टीति-दलेन दिल्ली-विधानसभा निर्वाचनाय विंशति-प्रत्याशीनां द्वितीया सूची प्रकाशिता



आम-आदमी-पार्टीति-दलेन आगामिने दिल्ली-विधानसभा निर्वाचनाय विंशति-प्रत्याशीनां द्वितीया सूची प्रकाशिता। अनेन दलेन पूर्व-मुख्यमन्त्रिणे मनीषसिसोदिया इत्यस्मै जङ्गपुराक्षेत्रं, अवधओझा इत्यस्मै पटपड़गंज क्षेत्रं, राखी-बिडला इत्यस्मै मादीपुरक्षेत्रं, प्रवीणकुमाराय जनकपुरीक्षेत्रं, सुरेन्द्रपालसिंहाय तिमारपुर विधानसभाक्षेत्रं, च आवण्टितम्। गतमासे आपदलेन दिल्लीविधानसभा-निर्वाचनाय एकादश-प्रत्याशीनां स्वीया प्रथमा सूची निस्सारिता।

## राष्ट्रपतेः यून् सुक् योल् इत्यस्य उपरि यात्रा-प्रतिबन्धम्



दक्षिणकोरिया-देशस्य अधिकारिणः गतमङ्गलवासरे अल्पकालिकस्य मार्शल्-लॉ इत्यस्य घोषणायाः विषयान्वेषणे वर्तमान राष्ट्रपतेः यून् सुक् योल् इत्यस्य उपरि यात्रा-प्रतिबन्धम् आरोपितवन्तः।

## "लौकिकन्यायकोशः" "विहङ्गमन्यायः

पिपीलिका यत् फलं प्राप्तुं न शक्नोति तत् कश्चन विहङ्गमः अनायासेन प्राप्तुं शक्नोति। एवमेव यं मोक्षम् अधमाधिकारी प्राप्तुं न शक्नोति तं कश्चन उत्तमाधिकारी मध्यमाधिकारी वा शीघ्रमेव प्राप्तुं शक्नोति यतः तादृशानां जन्मान्तरसंस्कारबलेन मनः शुद्धं भवति पूर्णप्रज्ञां च अधिगन्तुं शक्नोति। अयमेव अस्य भावः।

डा. वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्

## हिमाचले हिमपातस्य कारणेन ८७ मार्गाः ४५७ विद्युत्परावर्तकाः च स्थगिताः, १० स्थानेषु तापमानं न्यूनतायाम्



हिमसंस्कृतवार्ताः - शिमला। बहुकालानन्तरं हिमाचलप्रदेशे ऋतोः परिवर्तनं जातम्। रविवासरे शिमलासहितेषु हिमाचलस्य उच्चपर्वतीयक्षेत्रेषु हिमपातः अभवत्, बिलासपुरस्य नयनादेवी, काङ्गड़ा, कुल्लूः इत्यत्र च वर्षा अभवत्। शिमला, कुफरी, सिरमौरः, नौहराधारः, हरिपुरधारः, चम्बायाः किलाड़म्, मण्डी, कामरुनागः, शैटाधारः शिकारीदेवी च ऋतोः प्रथमः हिमपातः अभवत्। सिरमौर-जनपदस्य छितकुले किन्नरकैलाशे लाहौलस्पीतौ, रोहताङ्गदर्रा, बारालाचा, कोक्सर- सिस्सु- दार्चा- जिस्पा, कुन्जुमदर्रा सहितम् उच्चशिखरेषु अपि हिमपातः अभवत्। धर्मशालायाः नड्डी-मक्लोडगञ्जयोः वर्षा अभवत्। हिमपातानन्तरं सोमवासरे प्रातःकाले शिमलानगरे लघुसूर्यप्रकाशः आसीत्, परन्तु कठिनताः अद्यापि सन्ति। नवीनतमस्य हिमपातस्य अनन्तरं राज्यस्य एकस्मिन् राष्ट्रियराजमार्गे ८७ मार्गेषु च वाहनानां आवागमनं सोमवासरे प्रातः १०:०० वादनपर्यन्तं स्थगितम् अभवत्। यत्र सोलन, शिमला, कुल्लूः, मण्डी, किन्नौरः, चम्बा, सिरमौरः एतेषु जनपदेषु ४५७ विद्युत्परावर्तकाः प्रभाविताः सन्ति। रविवासरे प्रातःकाले रोहताङ्ग-कोक्सरस्थानयोः अपि लघुहिमपातः अभवत्।

### शीततरङ्गः वर्धते, मार्गाः स्खलिताः भवन्ति

उच्चशिमलायाः यातायातः अपि हिमपातस्य कारणेन प्रभावितः भवति। मार्गे हिमसञ्चयात् अधिकं स्खलनं भवति। वाहनानि स्खलन्ति। प्रशासनेन चालकान् सावधानतां स्वीकुर्वन्तु, आवश्यकतायाम् एव यात्रां कर्तुं च परामर्शः दत्तः अस्ति। अपरं तु हिमपातानन्तरम् अधिकांशक्षेत्रेषु शीततरङ्गस्य वृद्धिः अभवत्। विगत २४ होरासु अधिकांशस्थानकेषु न्यूनतमं तापमानं सामान्यतः २-३ डिग्री सेल्सियसपर्यन्तं न्यूनम् आसीत्। अधिकतमं तापमानं अपि सामान्यतः ३-४ डिग्री सेल्सियसपर्यन्तं न्यूनम् आसीत्। १० स्थानेषु न्यूनतमं तापमानं माइनस इति अभिलेखः अस्ति। अग्रिमेषु ४८ होरासु राज्यस्य अनेकेषु भागेषु न्यूनतमं अधिकतमं च तापमानं क्रमेण २-३ डिग्री सेल्सियसपर्यन्तं न्यूनीभवति। तदनन्तरं तापमाने किमपि प्रमुखं परिवर्तनं न भविष्यति।

### कोक्सरे रोहताङ्गे च पुनः हिमपातः, मनाली- केलाङ्ग- बससेवा पिहिता

अपरपक्षे रविवासरे प्रातःकाले अपि रोहताङ्गसहितं कोक्सरे लघुहिमपातः अभवत्। ऋतुं दृष्ट्वा अटलकन्दरारोहताङ्गं प्रति पर्यटकानाम् आगमनं तावत्पर्यन्तं स्थगितम् अस्ति। एकदिनपूर्वं उच्चशिखरेषु हिमपातस्य अनन्तरं मनाली- केलाङ्ग- क्षेत्रयोः मध्ये बससेवा बाधिता अस्ति। सम्प्रति न निगमस्य बसयानानि लाहौलं प्रति प्रेष्यन्ते न च लाहौलतः मनाली प्रति बसयानानि आगमिष्यन्ति। सोमवासरे अपि कुल्लु- लाहौलक्षेत्रयोः वातावरणं परिवर्तनशीलम् एव अस्ति।

### कारयानं हिमे स्खलितं, गर्ते च पतितम्, एकः मृतः

प्रदेशस्य एतेषु क्षेत्रेषु लघुहिमपातः अभवत्। अनेन क्षेत्रस्य कृषकाणाम्, उद्यानपालकानां च आशाः वर्धिताः। अपरपक्षे वर्षाकारणात् शुष्कशीतजन्यरोगाणां निवृत्तिः अपि जनाः प्राप्नुयुः। सोमवासरे मण्डले मार्गदुर्घटनायां एकस्य व्यक्तेः मृत्युः अभवत्। प्रारम्भिकसूचनानुसारं नौहराधारे हिमस्य उपरि स्खलितं वाहनं गर्ते पतितम्। तत्स्थानं प्राप्य पुलिसैः अग्रे कार्यविधिः आरब्धा।

# दमश्क़स्य पतनम् - असादकुलस्य सिरियातः निर्गमनस्य तात्पर्याणि

**- वेणुगोपालनारायणेन स्वाराज्यमैग् इत्यस्मिन् लिखितस्य लेखस्य ईदराधीराजेन कृतः अनुवादः**

बहुपूर्वं स्वलाभाय पाश्चात्योपनिवेशवादिभिः निर्मातानि सीमानः मानचित्राणि च आधुनिकपरिस्थित्यनुसारेण क्रौर्येण परिवर्तमानाः सन्ति।

सिरियायाः ऐतिहासिकी राजधानी दमश्कः सुन्नि-इस्लामवादि-सशस्त्र-दलेन विना युद्धं निगृहीतः।

समाचारे अस्पष्टे, अति अप्रमाणिते सति, याथार्थ्यमस्ति यत् हयअत्-तहरीर्-अल्-शम्-नामितं तुरुष्कमूलं तुरुष्कसमर्थितं पूर्व-अल्कायदासदस्यानां दलम् उत्तरे हलबतः, मध्ये हमसद्वारा दक्षिणे दमश्कं पर्यन्तं, केवलम् एकेन दिवसेन सिरियासेनया अनुमतम्।

दूरत्वं तु त्रिशतं किलोमितम्। रष्यादूडे इत्यस्य अनुसारेण सिरिया-राष्ट्रपतिः बषर-अल्-असादः तु स्वदेशात् पलायितवान्। अनिश्चितता अत्यन्तमेव।

अथ इस्रायलद्वारा हमासदलेन सह लिबनानेन सह च युद्धविरामस्य स्वीकृतेः परं सत्वरम् आरब्धस्य अस्य आश्चर्यजनकस्य उद्गमस्य तात्पर्याणि कानि?

प्रथमं तु असादकुलस्य अर्धशताब्दं यावत् शासनम् अन्ततां गतः। क्रूरः शासनकालः आसीत् यदा आधुनिकयुगस्य घोरतमाः अत्याचाराः कृताः। द्व्यशीत्यधिकोनविंशतिशततमे वर्षे हमा इत्यत्र सञ्जाते महमदीय-भ्रातृत्व-विद्रोहिणां नरसंहारे सहस्रशः हननं, पौराणामुपरि रासायनिकास्त्रप्रयोगः च विशेषतीव्रतायाः प्रतिकौ।

सरलतया उच्येत चेत्, सिरियायाम् असादकुलेन, प्रतिवेशिनि इराके सद्दाम-हुसैनेन आचरिता इयं राजनीतिः विभिन्नजातीनाम् उपरि यथेष्टं स्वलाभाय शासनं कर्तुं राजनैतिक-उपकरणम् आसीत्।

तृतीयमस्ति यत् दमश्क़स्य पतनेन, षियाधारितानाम् अलवीयानाम् अतिमहत्त्वपूर्णस्य प्राबल्यस्य अन्तः। विगतस्य शताब्दस्य प्रारम्भे फ्रन्सीयाः अस्याः जात्याः समर्थनं सहयोगं लब्धवन्तः ये किञ्चित्कालं यावत् अलवीयराज्यं सिरियासमुद्रतटीयक्षेत्रे ऊनविंशत्युत्तरोनविंशतिशततमे वर्षे निर्मितवन्तः। अलवीयाः परिस्थितीनाम् सदुपयोगं कृत्वा शासनतन्त्रस्य आधिकारिकपदानि गृहीतवन्तः। ततः परं शासनतन्त्रमेव वशीकृतवन्तः।

किन्तु सिरियायाः जनसङ्ख्यायाः पञ्चसप्तति-प्रतिशतं सुन्निजनाः। अन्यच्च, महमदीयानां बहवः सम्प्रदायाः अलवीयान् महमदीयान् न मन्यन्ते यतोहि अलवीयाः स्वपूजार्चनेषु मद्यस्य प्रयोगम् (इस्लामे वर्जितम्) कुर्वन्ति, प्रतिदिनम् आरधनां न कुर्वन्ति अपिच कुरानम् अतिरिच्य इतराणि शास्त्राणि मन्यन्ते, केषाञ्चन क्रैस्तवसाधूनाम् अपि वन्दन्ते।



परिणामतः ते लक्षीकृताः स्युः विशेषतः बहुकालं दमश्के निवसितवन्तः यतोहि दमश्के तेषां सङ्ख्या समुद्रतटीयक्षेत्राणाम् अपेक्षया न्यूना अस्ति। परिस्थितीः इतोऽपि विषमाः भवेयुः चेत् इमे अलवीयाः विदेशं शरणं गच्छेयुः यथा पूर्वं कुर्दीयाः सुन्नयः च।

चतुर्थमस्ति यत्, जय-मेननस्य अनुसारेण, सिरियासेनायाः युद्धनिर्वहणे वैफल्येन सिरियायाम् इरानसमर्थितस्य हिज़्बुल्लाहस्य प्राथमिकता वर्धिता। पूर्वं गृहयुद्धे हिज़्बुल्लाहः एव असादसमर्थने प्रमुखं सैन्यदलम् आसीत्। किन्तु अद्य तु हिज़्बुल्लाहः इस्रायलेन अक्षमः कृतः।

एवं सति इरानस्य प्रभावः न्यूनीभूतः। अस्मिन् स्थाने तुरुष्कदेशः हयअत्-तहरीर्-अल्-शम्-नामितं सुन्निदलं निर्मीय सिरियायाम् अग्रेसरति। इस्रायलेन आहते सत्यपि, इरानदेशः तु प्रतिक्रियां करिष्यति। किन्तु प्रतिक्रिया कथं भवेत् इति प्रश्नस्य उत्तरं दातुं कष्टतरम्।

उपप्रमेयस्य अनुसारेण तुरुष्कदेशः कथं हयअत्-तहरीर्-अल्-शम्-दलस्य नियन्त्रणं कथं नैरन्तर्येण करिष्यति इत्यपि अवगन्तुं कष्टम् यतोहि नियन्त्रणस्य आधारसूत्राणि दुर्बलानि। दलस्य सिरियायां वर्धनेन तुरुष्कस्य वशं न्यूनीभविष्यति।

अपिच तुरुष्काः तुरुष्काः एव अरबीयाः तु अरबीयाः। उभे जाती भिन्ना एव। तयोः भिन्नता न्यूना नैव।

अपिच अलवीयशासनात् विमुक्ताः सिरियास्थानीयाः कुर्दीयाः तुरुष्कदेशे निवासिभिः कुर्दीयैः सह मिलित्वा सहकार्यं कुर्युः यत् तुरुष्कदेशेन न अनुमतं स्यात्। ईदृशाः क्लेशाः भविष्यत्काले आगच्छेयुः।

पञ्चममस्ति यत् सिरियायाः अतिमहत्त्वपूर्णः षष्ठदशकात् मित्रदेशः रष्या अस्ति। रष्यासमर्थनेन हि असादकुलः इयत्कालं शासनारूढः। सिरियासमुद्रतटीयः तार्तुस-नामितः नौकाश्रयः सप्तमदशकात् रष्यानौसेनाश्रयः अस्ति। किन्तु वार्तावृत्तान्तानामनुसारेण तार्तुसतः रष्यानावः निर्गताः।

केचन वदन्ति यत् निर्गमनमिदम् अमेरिकया सह चर्चायाः अनुसारेण सञ्जातम्। यदि रष्या सिरियां त्यजति तर्हि युक्रेणीये दोन्बासे शासनं कर्तुं शक्नोति।

षष्ठः विषयः अस्ति असंस्कृततैलम्। अस्य शताब्दस्य आरम्भे सिरियायां पूर्वभागे इराकसीम्नः समीपे दियेरसज़ोरं परितः नूतनाः आविष्काराः तैलोत्पत्तिम् अर्धायुतमितेन पात्रैः वर्धयन्ति स्म। सिरियायाः निर्यातस्य पञ्चदश-प्रतिशतमितं तैलं, षष्टि-प्रतिशतमितः आयः। किन्तु निरन्तरविद्रोहैः गृहयुद्धेन च इतोऽपि उदागारिकस्रोतानाम् अन्वेषणं स्थिगतं जातम्। अन्विष्टानां तैलस्रोतानां विकासः अपि स्थगितः। अतएव तैलोत्पत्तिः पतिता।

तस्मात् यः कोऽपि दमश्के शासनं ग्रहीष्यति सः सिरियातैलोद्योगं पुनरारब्धुम् इष्यति। न इष्यति चेत् अपि पाश्चात्यतैलसंस्थाः प्रोत्साहयिष्यन्ति यथा इराकीये कुर्दीयप्रदेशे बगदादात् स्वतन्त्राः सन्ति।

अन्ततः सप्तमः विषयः अस्ति सिरियायाम् इस्लामीयतन्त्रम् अवर्जनीयं यतोहि असादः मुल्लाहान् पृष्ठभूमौ हि स्थापितवन्तः पुरा। अधुना ते अवसरं गृहीतुम् इच्छन्ति। हयअत्-तहरीर्-अल्-शम्-दलं तु अल्-कायदायां वा इस्लामीय-राष्ट्रे आधारितमेव। दमश्के बहु शताब्दानाम् अनन्तरम् अमीरस्य शासनं भवेत्।

समापने उच्यतां यत् उपनिवेशवाद-युगस्य अन्तस्य आरम्भः एवं दृश्यते। स्वलाभाय पाश्चात्योपनिवेशवादिभिः निर्मातानि सीमानः मानचित्राणि च आधुनिकपरिस्थित्यनुसारेण क्रौर्येण परिवर्तमानाः सन्ति। अपिच आयाताः कृत्रिमाः धर्मनिरपेक्षसिद्धान्ताः त्यक्ता भविष्यति येषां स्थाने स्थानीयाः सिद्धान्ताः आगच्छेयुः।

## भादसों नगरे श्रीमद्भगवद्गीतायां विद्यार्थी जीवनस्य सूत्र विषयोपरि अभवत् व्याख्यानम्



संस्कृतभारती ,पञ्जाबप्रान्तः तथा यंग फॉर्मरज पब्लिक हाई स्कूल भादसों एतयोः संयुक्त तत्त्वावधानेन दस -दिवसीय -संभाषण-शिबिरं सञ्जातम् । विद्यालयस्य प्राचार्या मनजीतकौरगरेवालमहोदयायाः अध्यक्षतायां श्रीगीताजयन्ती महोत्सवस्य उपलक्ष्ये श्रीमद्भगवद्गीतायां विद्यार्थी जीवनस्य सुत्र -विषयोपरि व्याख्यानमपि जातम् । यस्मिन् पटियाला -जिलामन्त्री श्रीमन् गगनदीपपाठकमहोदयः मुख्यवक्ता रूपेण आसीत् । महोदयेन छात्रेभ्यः श्रीमद्भगवद्गीतायाः विभिन्न प्रसङ्गानां विद्यार्थी जीवने उपयोगितायाः चर्चा कृता । अवसरेस्मिन् विद्यालये विज्ञानप्रदर्शन्याः अपि आयोजनं कृतम् यस्मिन् विद्यालयस्य सर्वे छात्राः भागं गृहीत्वा प्राचीनभारतीयज्ञान-विज्ञानपरम्परायाः विषये ज्ञातवन्तः । अवसरेस्मिन् नाभा नगरस्य विस्तारकः मनीषमहोदयः तथाश्च विद्यालयस्य उप-प्राचार्य श्रीमन्जशनदीपकुमारमहोदयः आसीत् तथा विद्यालयस्य अन्य शिक्षकानां सहयोगम् अपि प्राप्तवन्तः ।

## उत्तराखण्डः- द्विदिवसीयम् अखिल-भारतीयसंस्कृतशोधसम्मेलनम् सुसम्पन्नम्

हरिद्वारम् । उत्तराखण्ड-संस्कृत-अकादमीद्वारा भारतीयज्ञानपरम्परायाः संवर्धनाय 'वर्तमाने भारतीयसंस्कृतज्ञानपरम्परायाः उपादेयता' अस्य विषयस्य अन्तर्गतं द्विदिवसीयम् अखिलभारतीयं संस्कृतशोधसम्मेलनम् अकादम्याः संस्कृतभवने रानीपुरझाले ज्वालापुरहरिद्वारे कुशलतया सम्पन्नं जातं । समापनसमारोहे दीपप्रज्वालनं विद्वद्भिः वैदिकमन्त्रैः सह कृतं तदनन्तरं सर्वेषां पुरस्तात् संस्कृताविर्भावविषये श्रीशैलशतिवारी-महोदयः मार्गदर्शनं कृतवान् यत् भारतीय-ज्ञानपरम्परा अनादिकालात् मानवजीवनं प्रेरयति। च शास्त्राध्ययनपरम्परा - वेदव्यासमहाभागः देवभूमितः आरभ्य शास्त्राध्ययनपरम्परां स्थापितवान्। आश्रमसंस्थायाः महत्त्वम् - कण्वाश्रमः, द्रोणाश्रमः च विद्याप्राप्तये प्रसिद्धौ। गुरुकुलव्यवस्थायां छात्राः गृहभिक्षाटनद्वारा गुरुदक्षिणां सम्पाद्य अध्ययनं कुर्वन्ति स्म। त्यागः च पुरुषार्थः - चतुर्णां पुरुषार्थानां त्यागस्य च महत्त्वं विस्तरेण प्रतिपादितम्। महोदयेन वैज्ञानिकदृष्ट्या दिव्यास्त्राणां अध्ययनम् - दिव्यास्त्राणां वैज्ञानिकतत्त्वानि उद्घाटितानि।

डा. आनन्दभारद्वाज-महोदयः समारोहे उक्तवान् यत् आंइस्टीनस्य ऊर्जा-संरक्षणसिद्धान्तं तथा न्यूटनस्य बलसिद्धान्तं गीता-सिद्धान्तैः सह तुलयित्वा प्रस्तुतम्। एते सिद्धान्ताः संस्कृतवाङ्मयेन प्रेरिताः इति निर्दिष्टम्। सुजीतसिंहपंवार-महोदयेन भारतीयसंस्कृतौ गर्भस्थशिशोः विज्ञानं विशदं कृतम्। गर्भे शिशोः स्थिति, विकासः च पुराणेषु उल्लिखितः। तेन सहैव संस्कृत-विज्ञानं आधुनिक-विज्ञानस्य मार्गदर्शकं भवति इति अभिप्रेरितम्। प्रकाशजोशी-महोदयेन संस्कृतशिक्षायाम् संस्कृतक्रीडायाः भूमिका प्रतिपादिता। च संस्कृतक्रीडायाः प्रसाराय सहकारं अपेक्षितम् इति प्रोक्तं सम्मेलनस्य विशेषता आसीत् यत्विभिन्नसत्रेषु अध्यक्षाः सत्रसंयोजकाः च सम्यक् संचालनं कृतवन्तः।विद्वांसः विविधविषयेषु शोधपत्राणि प्रस्तुतवन्तः। अन्तिमसत्रं डा.प्रकाशपन्तवर्यस्य अध्यक्षतायां च कुलदीपमैन्दोलावर्यस्य संचालने च ओमप्रकाशभट्टवर्यस्य अध्यक्षतायां तथा च डा.राघवझावर्यस्य संचालने पूर्णः जातः । सर्वेभ्यः शोधवाचकेभ्यः प्रमाणपत्रम् अतिथिभिः प्रदत्तं। भारतीय-ज्ञानपरम्परायाः प्राचीन-विज्ञानं, चिकित्सा-विज्ञानं च आधुनिकसन्दर्भे विचारितम्। उद्घाटनस्य च समापनस्य मंचसंचालनं शोधाधिकारी डा. हरीशगुरुरानी कृतवान्।